# केन्द्रीयसंस्कृतविश्वविद्यालय- अधिनियम, 2020

## 2020 वर्षस्य संख्या-5

**[25 मार्च, 2020]**

संस्कृते अध्यापनार्थमनुसन्धानार्थं विश्वविद्यालयानां स्थापनार्थं समावेशार्थञ्च, सर्वविधसमावेशिसंस्कृतप्रचारगतिविधीनां विकासार्थं, तथा तत्सम्बद्धविषयाणाम् आनुषङ्गिकविषयाणां वा उपबन्धार्थम्, अधिनियमोऽयं वर्तते । भारतदेशस्य संसदा एकसप्ततितमगणतन्त्रवर्षे निम्नलिखितरूपेण अयमधिनियमितः स्यात्, तद्यथा -

1. (1) अधिनियमोऽयं केन्द्रीयसंस्कृतविश्वविद्यालयानामधिनियम:- 2020 इति नाम्ना व्यवहर्तुं शक्यते।

(2) अधिनियमोऽयम्केन्द्रसर्वकारेणआधिकारिकराजपत्रद्वारा अधिसूचितदिनाङ्कात् क्रियान्वितो भवति ।

2. अस्मिन् अधिनियमे परिनियमेषु च प्रयुक्तानां शब्दानां परिभाषा यथासन्दर्भं अधोलिखितरूपेण स्वीकरणीया ।

**(a) विद्वत्परिषत्** -विश्वविद्यालयस्य विद्वत्परिषद् इति।

**(b) शैक्षिककर्मचारिणः** - कर्मचारिणां तादृशी श्रेणी भवति, ये परिनियमैः अध्यादेशैः च शैक्षिककर्मचारिण इति समुद्दिष्टा भवन्ति ।

**(c) अध्ययनमण्डलम्** - विश्वविद्यालयस्य कस्यापि विभागस्य अध्ययनमण्डलम् इति ।

**(d) परिसर:-** विश्वविद्यालयद्वारासंस्कृतस्य उपदेशनार्थम् अनुसन्धानार्थं शिक्षायै प्रशिक्षणार्थं च भारतदेशे भारताद् बहिः वा स्थापितः सङ्घटितो वा भागः (स्थापिता सङ्घटिता वा शाखा ) । अस्य अधिनियमस्य क्रियान्वयनात् प्राक् स्थापिताः परिसरा अपि अस्मिन् अन्तर्भवन्ति ।

**(e) कुलाधिपतिः एवं कुलपतिः** - क्रमशः, विश्वविद्यालयस्यकुलाधिपतिः एवं कुलपतिः इत्यर्थः ।

**(f) महाविद्यालय:** - इत्युक्ते विश्वविद्यालयेन मान्यताप्राप्तः मानितः सम्बद्धोऽथवा निर्वाहितो महाविद्यालय इत्यर्थः ।

**(g) तत्संवादिविश्वविद्यालयः एवं मानितविश्वविद्यालयः** - समितिसन्दर्भे अयमर्थः।

(i) राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, इत्युक्ते राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली यस्य स्थापना 1970 तमे संवत्सरे अभवत् । यस्य 2002 तमे संवत्सरे मानितविश्वविद्यालयस्तर: प्रदत्त आसीत् ।

(ii)श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली, इत्युक्ते श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली, 1962 तमे संवत्सरे स्थापितमभवत्। यस्य 1987 तमे संवत्सरे मानितविश्वविद्यालयस्तर: प्रदत्त आसीत् ।

(iii) राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः इत्युक्ते राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः अस्य स्थापना 1961 तमे संवत्सरे अभवत् । यस्य 1987 तमे संवत्सरे मानितविश्वविद्यालयस्तर: प्रदत्त आसीत् ।

**(h) न्यायालयः -** विश्वविद्यालयस्य न्यायालय (विश्वविद्यालयीयन्यायालय : ) इति । (i) विभागः - इत्युक्ते अध्ययनविभागः इति। अस्मिन् अध्ययनकेन्द्रमपि अन्तर्भवति।

**(j) निदेशक: -** कस्यापि परिसरस्य अथवा दूरस्थशिक्षाव्यवस्थायाः प्रमुखः, अथवा विश्वविद्यालयस्य कार्यपरिषदा एवं परिनियमैः अनुमोदितायाः कस्याश्चित् शैक्षणिकशाखाया: प्रमुख: ।

**(k) दूरस्थशिक्षाप्रणाली -** इत्युक्ते सम्प्रेषणमाध्यमेन (सम्प्रेषणमाध्यमसाध्या) शिक्षाप्रदानस्य प्रणाली । तत्र च साधनानिसम्प्रेषणमाध्यमानितानि – ध्वनिप्रसारणम्, दूरदर्शनम्, अन्तर्जालम्, पत्राचारपाठ्यक्रमः, सङ्गोष्ठी, सम्पर्ककार्यक्रमः, एवं नियमितशिक्षाप्रणालीम् अन्तरा अनौपचारिकप्रतिमानसाध्या अथवा एतादृशेषु

माध्यमेषु केनचित् द्वयेन ततोऽधिकेन वा संसाध्या ।

**(l) कर्मचारी -** इत्युक्ते विश्वविद्यालयद्वारा नियमितरूपेण नियुक्ता कापि व्यक्तिः । अस्मिन् अध्यापकाः अध्यापकेतराश्च अन्तर्भवन्ति । परन्तु अस्मिन् विश्वविद्यालयेन सह सम्बद्धायां मानितायांअनुदानेन पोषितायांवा, कस्यामपि संस्थायाम् अथवा तादृशमहाविद्यालयेषु कार्यरतः कर्मचारी न अन्तर्भवति ।

**(m) कार्यपरिषत् -** विश्वविद्यालयस्य कार्यपरिषत् ।

**(n) अध्यापकाः -** विश्वविद्यालयस्य अध्यापकाः।

**(0) आवासस्थानम्/छात्रावासः -** विश्वविद्यालयेन अधिकृते क्षेत्रे, परिसरे, महाविद्यालये, केन्द्रे, विभागे च कार्यरतानां अधिकारिणां कर्मचारिणां, छात्राणां कृते कल्पितानि निवासस्थानानि अथवा निगमजीवनाश्रयाणि यानि विश्वविद्यालयेन परिपालितानि, छात्रावासादीनि भवनानि ।

**(p) संस्था –** शैक्षणिकसंस्था । न तु विश्वविद्यालयेन स्थापितः/ पालित: /संरक्षित: /संपोषित:, सम्बद्धः प्राप्तमान्यताक: वा परिसर: महाविद्यालयो वा ।

**(q) प्राचार्य: -** विश्वविद्यालयेन स्थापितस्यसंपोषितस्य वा कस्याश्चित्संस्थाया: महाविद्यालयस्य विद्यालयस्य वा प्रमुखः ।

**(r) विनियमाः -** एतदधिनियमानुगुणं विश्वविद्यालयस्य केनापि प्राधिकारिणा कृताः निर्धारितकालं यावत् प्रवर्तमानाः नियमाः ।

**(s) संस्कृतम् –** आधुनिकरूपेण शास्त्रीयरूपेण अथवा प्राचीनरूपेण विद्यमाना संस्कृतभाषा, तथा तत्र उपलभ्यमानः तत्सम्बद्धो वा ज्ञानराशिश्च ।

**(t) अनुसूची -** इत्युक्ते अनेन अधिनियमेन सह अनुबद्धा एका अनुसूची ।

**(u) विद्यालय: -** माध्यमिकस्तरीयः प्राथमिकस्तरीयः एवं प्रारम्भिकस्तरीयः तत्समकक्षो वाविश्वविद्यालयेन मानित: संबद्धः संपोषित: वा विद्यालयः ।

**(v) अध्ययनसङ्काय: -** विश्वविद्यालयस्य एकः अध्ययनसङ्कायः ।

**(w) सामाजिकसंस्था-** १८६०**सामाजिकसंस्थापञ्जीकरणाधिनियमानुगुणं** पञ्जीकृतासु एतासु संस्थासु अन्यतमा

(i) राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ( पञ्जीकरणसंख्या S/4694, 1970-71);

(ii) श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली ( पञ्जीकरणसंख्या S/7454, 1987);

(iii) राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः (पञ्जीकरणसंख्या 345, 1986 );

**(x) परिनियमाः अध्यादेशाश्च -** तत्तत्काले प्रवर्तिताः विश्वविद्यालयस्य परिनियमाः अध्यादेशाश्च।

**(y) विश्वविद्यालयस्य अध्यापकाः -** आचार्याः, सहाचार्याः, सहायकाचार्याः एवञ्च अन्ये च ये विश्वविद्यालये, विश्वविद्यालयेन संपोषितमहाविद्यालये केन्द्रे वा अध्यापनाय-अनुसन्धानाय च विश्वविद्यालयस्य अध्यादेशैः नियुक्ताः । परन्तु विश्वविद्यालयेन सह सम्बद्धायां मानितायां प्राप्तानुदानायां संस्थायाम् अथवा तादृशमहाविद्यालयेषु कार्यरताः अध्यापकाः अस्मिन् न अन्तर्भवन्ति।

**(2) विश्वविद्यालयः -** इत्युक्ते अनेन अधिनियमेन स्थापितः समाविष्टश्च (समावेशितश्च) विश्वविद्यालयः ।

**3.** (1) अधोनिर्दिष्टाः त्रयः मानितविश्वविद्यालयाः प्रत्येकं केन्द्रीयविश्वविद्यालयत्वेन अधोनिर्दिष्टरूपेण संस्थापिता भवेयुः ।

(a). देहलीस्थं राष्ट्रियसंस्कृतसंस्थानं सपरिसरं प्रथमानुसूच्यनुसारं, अनेन अधिनियमेन विशेषनिगमनिकायान्तर्गतं केन्द्रीयसंस्कृतविश्वविद्यालयः इति नाम्ना स्थापितो भवेत्, यस्य च मुख्यालयः देहल्यां भवति ।

(b). देहलीस्थं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठं निर्दिष्टप्रथमानुसूच्यनुसारं, अनेन अधिनियमेन विशेषनिगमनिकायान्तर्गतं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः इति नाम्ना स्थापितो भविष्यति, यस्य मुख्यालयः देहल्यां भवति।

(c). तिरुपतिस्थं राष्ट्रियसंस्कृतविद्यापीठं निर्दिष्टप्रथमानुसूच्यनुसारं, अनेन अधिनियमेन विशेषनिगमनिकायान्तर्गतं राष्ट्रियसंस्कृतविश्वविद्यालयः इति नाम्ना स्थापितो भविष्यति, यस्य मुख्यालयः तिरुपतौ भवति ।

(2) प्रत्येकं विश्वविद्यालयस्य पदाधिकारिणः यथा कुलाधिपतिः, कुलपतिः, कार्यपरिषदः सदस्याः, विद्वत्परिषदः सदस्या (कार्यपरिषत्सदस्याः, विद्वत्परिषत्सदस्याः) अपि च इतः परं भाव्यधिकारिणः सदस्याः वा यावत्पर्यन्तं स्वपदेषु भवन्ति तावत् तत्समुदायरूपः/ तदन्तर्भावितः/ तदन्तर्गतः निगमनिकायरूपः विश्वविद्यालयनाम्ना निर्मितो भवति ।

(3) विश्वविद्यालयस्य सततविकासा सर्वविधन्यायिक प्रक्रियानिष्पादनार्थं सामान्यमुद्राङ्कनं विश्वविद्यालयस्य नाम्ना भवेत्।

**4. अस्य अधिनियमस्य क्रियान्वयनदिनाङ्कात् -**

(a) राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, श्रीलालबाहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, इति तिस्रः संस्थाः अनेन अधिनियमेन विघटिताः भविष्यन्ति ।

(b) समितेः मानितविश्वविद्यालयस्य वा कस्मिंश्चिन्नियमे (एतदधिनियमं विहाय) अनुबन्धे अन्यसाधने वा कश्चन अपि सन्दर्भः एदधिनियमेन स्थापितस्य निगमितस्य च सम्बन्धितविश्वविद्यालयस्य सन्दर्भे मंस्यते ।

(c) अनेन अधिनियमेन पूर्वतनमानितविश्वविद्यालयानां स्थावरास्थावरसम्पदः सम्बन्धितविश्वविद्यालयेषु एव अन्तर्भूताः भविष्यन्ति।

(d) समितेः मानितविश्वविद्यालयानां च सर्वेऽपि अधिकाराः सर्वाणि उत्तरदायित्वानि च अनेन अधिनियमेन स्थापितानां निगमितानां च सम्बन्धितविश्वविद्यालयानां कृते हस्तान्तरितानि भविष्यन्ति । अथ च तेऽधिकाराः तानि चोत्तरदायित्वानि एतदधिनियमसम्बन्धिविश्वविद्यालयानामेव अधिकारा उत्तरदायित्वानि च भविष्यन्ति ।

(e) कयाचित् समित्या केनचित् मानितविश्वविद्यालयेन वा एतादृशप्रकल्पात् अव्यवहितप्राङ्नियोजिता प्रत्येकं व्यक्तिः एतदधिनियमेन स्थापितेषु निगमितेषु च एतदधिनियमसम्बन्धिविश्वविद्यालयेषु यथापूर्वं स्वकार्यालयं सेवां वा धारयिष्यति । एतदधिनियमानुसारं सम्बन्धितविश्वविद्यालयस्य कर्मचारिणां पारिश्रमिक - निबन्धननियम- विशेषाधिकार-सेवावृत्ति-अवकाश-आनुतोषिक-सञ्चयनिध्यादीनि तथा च अन्ये विषयाः यथापूर्वं सेवानिवृत्तिकालपर्यन्तं भविष्यन्ति, यदि अधिनियमस्य परिनियमनं न भवति । कार्यकारिणीपरिषदा एते पारिश्रमिकनियमनिबन्धनादिविषयाः परिवर्तयितुं शक्यन्ते, अधिनियमस्य परिनियमनात् परम् ।

परन्तु यदि एवंविधं परिवर्तनं केनचित् कर्मचारिणा अस्वीकार्यं भवति तर्हि तस्य सेवावध्यनुगुणं विश्वविद्यालयः तस्य सेवां निरस्तीकर्तुम् अधिकृतो भविष्यति । अथवा एतादृशविधेरभावे प्रतिपूर्त्यर्थं स्थायिकर्मचारिणां कृते मासत्रयस्य अन्येषां कृते च एकमासस्य वेतनं प्रदेयं भवति । अनुच्छेद- ३४ नियमानुसारम् अस्मात् अधिनियमात् पूर्वं कार्यरताः कर्मचारिणः अधिनियमस्य नियमात् परं परिनियमत्वेन निर्दिष्टसमयपर्यन्तं नियुक्ताः भविष्यन्ति ।

अपि च मानितविश्वविद्यालयस्य कुलपतिनाम्ना वर्तमानकाले प्रवर्तमाने यस्मिन् कस्मिन् उल्लेखे, अनुबन्धे वा, केनचित् प्रकारेण शब्देन वा यः कोऽपि सन्दर्भः प्रदत्तः स सर्वोऽपि अस्य अधिनियमस्य अन्तर्गततया संस्थापितस्य निगमितस्य च विश्वविद्यालयस्य कुलपतिसम्बद्धो भवेत् ।

(f) अधिनियमस्य अस्य अन्वयनात्पूर्वं नियुक्तः मानितविश्वविद्यालयस्य कुलपतिपदे कार्यरतः, स एव परमपि अनेन अधिनियमेन विश्वविद्यालयस्य कुलपतिपदे नियुक्तः सन् निश्चितकालं यावत् कार्यरतो भवेत् ।

(g) पूर्वं मानितविश्वविद्यालयेन प्राधिकृताः महाविद्यालयाः, संस्थाः, विद्यापीठानि, विभागाः यथापूर्वं सम्बद्धा: पोषिताः अनुरक्षिताश्च आसन्, अधिनियमस्य नियमनात् परमपिते तत्सम्बन्धिविश्वविद्यालयस्य अधीने तथैव भवेयुः ।

5. विश्वविद्यालयस्य उद्देश्यानि तु - संस्कृतभाषाया: तथा च तत्सम्बद्धानाञ्च अन्येषां समुचितविद्याशाखानां संवर्धनाय ज्ञानप्रसार-उन्नतशिक्षाप्रदानानुसन्धान-विस्तरणसौविध्यप्रकल्पनं; विशेषतया मानवीय-सामाजिक-वैज्ञानिकविषयाणां शैक्षिककार्यक्रमेषु समन्वयनं; शिक्षणाधिगमप्रक्रियायां नवाचाराणां प्रोत्साहनाय आन्त:शास्त्रीयाध्ययनाय अनुसन्धानाय च समुचितोपक्रमाः आत्मसात्करणं; संस्कृत-शास्त्रक्षेत्रे समग्रविकासाय, प्रसाराय, संरक्षणाय, अनुसन्धानाय च समर्थानां निर्माणाय शिक्षणं प्रशिक्षणञ्च ।

**6. (1) विश्वविद्यालयस्य एते अधिकाराः भवन्ति –** यथा -

(i) अनुसन्धानाय, ज्ञानप्रोन्नतये, विस्ताराय, वा अवसरं प्रदातुं, परिनियमानुसारं (statute) अथवा विश्वविद्यालयेन समये समये क्रियमाणं निर्धारणानुसारं वा संस्कृत- तच्छास्त्रान्तर्गततया, निर्दिष्टविद्याशाखासु च बोधनम् ।

(ii) विश्वविद्यालयनियमानुसारं परीक्षाधारेण, मूल्याङ्कनाधारेण अन्यया परीक्षापद्धत्या वा डिप्लोमा / प्रमाणपत्राणाम्, उपाधीनाम् अथवा अन्यशैक्षिकस्तराणाम् प्रदानम्; तथा डिप्लोमा / प्रमाणपत्राणाम्, सम्मानोपाधीनां शैक्षिकस्तराणां (academic distinctions) वा समुचितेन पर्याप्तेन कारणेन उपसंहरणम् ।

(iii) संस्कृतशिक्षासंवर्धनायमुक्ताध्ययनस्य (external studies), प्रशिक्षणस्य विस्तृतसेवानाम् (extension services) आयोजनम्, उपक्रमणञ्च ।

(iv) परिनियमनिर्देशानुसारं सम्मानोपाधीनाम् अन्यविशिष्टोपाधीनाञ्च प्रदानम्।

(v) यथानियमं दूरविद्याप्रणाल्या अन्तर्जालपद्धत्या वा शिक्षणाय अधिगमाय च सौविध्यकल्पनम्।

(vi) विश्वविद्यालयस्तरे, महाविद्यालयस्तरे च शिक्षाप्रदानम्, विभिन्नविद्याशाखासु उत्कृष्टताया: नवाचारसम्पादनाय समुचितमपि, इतः पूर्वं विश्वविद्यालय-अनुबद्धेषु-विद्यालयेष्वपि शिक्षाप्रदानम् अनुवर्तनीयम् ।

(vii) विश्वविद्यालयनिर्णयानुसारं भारतीयतत्त्वशास्त्रेषु पालि- प्राकृतभाषासु संस्कृतसाहित्ये योगायुर्वेद-प्रकृतिचिकित्सादि-विभिन्नविद्याशाखासु उच्चशिक्षाप्रदानाय सौविध्यकल्पनम्।

(viii) विश्वविद्यालये अपेक्षितानां प्राचार्य-आचार्य-सहाचार्य-सहायकाचार्याद्यन्यशैक्षिकपदानां व्यवस्थापनम् (कल्पनं) (institute), एवमेतेषु पदेषु व्यक्तीनां नियोजनञ्च।

(ix) विश्वविद्यालयेन निर्धारितानाम् उद्देश्यानां पूर्त्यर्थं कस्या अपि उन्नतशिक्षणसंस्थायाः मान्यताप्रदानम्, तादृशमान्यतायाः उपसंहरणञ्च ।

(x) परिनियममनुसृत्य (statutes) कस्मिन्नपि विश्वविद्यालयान्तरे शैक्षणिकसंस्थासु वा कार्यरतानां व्यक्तीनां विश्वविद्यालये शिक्षकरूपेण नियोजनम्।

(xi) परिनियममनुसृत्य (statutes) प्राशासनिक-लिपिकवर्गीयाणाम् (ministerial) अन्यपदानां च सर्जनम्, तेषु पदेषु नियमिताधारेण (regular basis), अंशकालिकाधारेण (short-term basis) च नियोजनम् ।

(xii) विश्वविद्यालयेन निर्धारितोद्देश्यानां पूर्त्यर्थं यथाप्रक्रियम् अन्यविश्वविद्यालयेन सह, प्राधिकारेण सह (authority), उच्चशिक्षासंस्थया सह, देशान्तरे विद्यमानसंस्थाभिः सह अपि सहयोजनं (co-operate), सम्बन्धनञ्च संघटनम् ।

(xiii) विश्वविद्यालयस्य उद्देश्यानाम् क्रियान्वयनाय अपेक्षितानां कलाशालानां, संस्थानां, केन्द्राणां, विशिष्टप्रयोगशालानां, अनुसन्धान-अनुदेशनविभागानाञ्च स्थापनं, पोषणं (maintain), अनुबन्धनं (affiliation), मान्यताप्रदानं च।

(xiv) अध्येतृवृत्तीनां (fellowships), छात्रवृत्तीनां (scholarships), उपकारवेतनानां(studentships), पदकानां, पुरस्काराणां व्यवस्थापनं प्रदानञ्च।

(xv) यथा विश्वविद्यालाय: समुचितं भावयति, तथा अनुसन्धान- परामर्शादिसेवानां कल्पनम्, तदर्थम् अन्यविश्वविद्यालयैः सह, संस्थाभिः सह वा अनुबन्धकल्पनम् ।

(xvi) शिक्षकेभ्यः, मूल्यमापकेभ्यः तथा अन्यशैक्षिक-तदितरकर्मचारिभ्यः पुनर्नवीकरणपाठ्यक्रमाणां, कार्यशालानां सङ्गोष्ठीनां, अन्यकार्यक्रमाणाम् आयोजनं निर्वहणञ्च ।

(xvii) विश्वविद्यालयस्य उद्देश्यानां क्रियान्वयनाय केनचित्समयबन्धेन सन्दर्शकाचार्याणां / आगन्तुकाचार्याणां (visiting professors), विशिष्टाचार्याणाम्, (Emeritus Professors.) सम्पर्कसाधकानां (consultants), निपुणानाम् (professionals), अधिवक्तृणाम् (advocates), न्यायवादिनाम् (counsels), विशेषज्ञानां (specialist) अन्येषाञ्च संस्थाया: हितसाधकानां नियोजनम्।

(xviii) यथापरिनियमं कलाशालायाः, संस्थायाः, विभागस्य वा स्वायत्ततताप्रदानम् (autonomous status)।

(xix) विश्वविद्यालये प्रवेशाय मानदण्डानां, योग्यतानां वा निर्धारणम् । यत्र परीक्षा, मूल्याङ्कनं, अन्य: कोऽपि परीक्षणविधिः वा अन्तर्भवितुमर्हति ।

(xx) विश्वविद्यालयीयपरिनियमानुसारम् अध्ययनशुल्कानाम्, तदितरशुल्कानाम् विधानं (demand)स्वीकरणञ्च।

(xxi) विश्वविद्यालयस्य कर्मचारि-शिक्षक-च्छात्रनिवासानां पर्यवेक्षणं, अथवा तदर्थं नियोजनं, तथा तेषां स्वास्थ्यसंवर्धनाय, कल्याणाय च व्यवस्थाकल्पनम्।

(xxii) सर्ववर्गीय-कर्मचारिसम्बद्धानां सेवानियमानां तथा आचारविधीनां निर्धारणम् ।

(xxiii) विश्वविद्यालयस्य छात्रेषु कर्मचारिषु वा अनुशासनस्य नियन्त्रणं विधानं च । तथा विश्वविद्यालयनियमानुसारं समये अत्यावश्यकानुशासनिकोपक्रमणम्। (to take disciplinary measures)

(xxiv) महिलाभ्यः, शिशुभ्यः, दिव्याङ्गेभ्यः विशेषव्यवस्थाकल्पनम् यां व्यवस्थां विश्वविद्यालय: अपेक्षणीयां भावयति ।

(xxv) विश्वविद्यालयस्य उद्देश्यानाम् अग्रसारणाय उपकाराणां, दानानां, धनपारितोषकानां वास्वीकरणम्, विश्वविद्यालयस्य उपयोगायकेन्द्रसर्वकारस्य पूर्वानुमत्या कस्यापि न्याससम्बद्धस्य (trust) अक्षयनिधेश्च (endowment) चलाचलसम्पत्तेः ग्रहणम्, प्रबन्धनम्, विसर्जनञ्च।

(xxvi) विश्वविद्यालयस्य उपयोगाय केन्द्रसर्वकारस्य पूर्वानुमत्या विश्वविद्यालयस्य सम्पत्तेः सुरक्षायै ऋणग्रहणम्।

(xxvii) केन्द्रसर्वकारस्य पूर्वानुमत्या स्थापनक्रियामनुसृत्य (procedure established thereof) विश्वविद्यालयस्य नूतनवैदेशिकपरिसराणां (off-shore campus) केन्द्राणाञ्च स्थापनम्।

(xxviii) विश्वविद्यालयस्य सर्वेषां, कतिपयोद्देश्यानां वा प्राप्त्यर्थम् आवश्यकानाम् आनुषङ्गिकसहायकक्रियाणां सम्पादनम्।

(2) उपधारायां निर्दिष्टाधिकाराणां प्रयोगं कुर्वन् (1) विश्वविद्यालयः अखिलभारतीयचरित्रस्य व्यवस्थापने, शिक्षणे अनुसन्धाने च उन्नतमानकानां निर्वहणे च प्रयासं कुर्यात् । एतस्य उद्देश्यस्य प्राप्त्यर्थं विशेषरूपेण अधोनिर्दिष्टमापनानां निर्धारणं कुर्यात् । यथा -

(i) अखिलभारतीयाधारेण छात्राणां प्रवेशः, शिक्षकाणां नियुक्तिश्च ।

(ii) विश्वविद्यालयेन वैयक्तिकरूपेण, अन्यविश्वविद्यालयैः सह मिलित्वा वा आयोजितायां सामान्यप्रवेशपरीक्षायां प्राप्तयोग्यताधारेण, अथवा येषुपाठ्यक्रमेषु छात्राणां स्वीकृतिः न्यूना भवति, तेषु पाठ्यक्रमेषु पूर्वयोग्यतासम्बद्धपरीक्षायां प्राप्ताङ्कानामाधारेण वा छात्राणां प्रवेशः करणीयः ।

(ii) शिक्षकाणां संवहननिवृत्तिवेतनसहितस्य (portable pension), वरिष्ठतासुरक्षासहितस्य च अन्तर्विश्वविद्यालय-गतिशीलतायाः प्रोत्साहनम् ।

(iv) सत्रीयप्रणाल्याः (semester system), सततमूल्याङ्कनस्य (continuous evaluation), ऐच्छिकक्रेडिट्- प्रणाल्या: (CBCS), अन्यप्राचीनपारम्परिक्याः अथवा आधुनिकोपयुक्तप्रणाल्याः वा, या उचिताभवति तस्याः, आरम्भः। क्रेडिट्हस्तान्तरणस्य कृते (credit transfer) संयुक्तस्नातकोपाधिपाठ्यक्रमाणां कृते (joint degree programmes) अन्यविश्वविद्यालयैः सह, शैक्षिकसंस्थाभिः सह सहमतिः (agreement)।

(v) कार्यपरिषदा निर्धारितनियमाननुसृत्य निर्धारितक्षेत्रेषु गुरुकुलानां, वेदशालासहितपारम्परिकशिक्षणप्रणालीनां परिग्रहणम् (adopted)।

7. विश्वविद्यालयः कस्यापि लिङ्गस्य, कस्या अपि जातेः, कस्यापि सम्प्रदायस्य, कस्यापि वर्गस्य अर्थात् सर्वेषां कृते मुक्तः वर्तते । तथा च विश्वविद्यालयः कामपि व्यक्तिं धार्मिकविश्वासम् अथवा वृत्तेः परीक्षणं स्वायत्तीकर्तुं विधातुं वा अर्हः न भवति । कापि व्यक्तिः विश्वविद्यालये शिक्षकत्वेन नियोक्तुम् अथवा अन्यपदस्य धारणार्थम् अर्हा भवति । एवमेव छात्रत्वेन उत स्नातकत्वेन विश्वविद्यालये प्रवेष्टुम् अथवा कस्यापि विशेषाधिकारस्य आनन्दं प्राप्तुम् आहोस्वित् प्रयोगार्थम् अधिकारं प्रददाति । अस्याः धारायाः किमपि वचनं विश्वविद्यालये महिलानां दिव्याङ्गव्यक्तीनां समाजसम्बद्धसामान्यव्यक्तीनां विशेषेण अनुसूचितजातिजनजातिव्यक्तीनाम्, अन्यसामाजिकानां शैक्षिकदृष्ट्या पृष्ठतः वर्तमानानाम्, अनारक्षितवर्गे आर्थिकदृष्ट्या पृष्ठतः वर्तमानानाम् एवं केन्द्रसर्वकारेण समये समये निर्धारितानाम् अन्यविशेषश्रेणीनां वा उद्योगार्थं प्रवेशार्थं वा विशेषप्रावधानं न अवरोधयति ।

8. (1) भारतस्य राष्ट्रपतिः विश्वविद्यालयस्य कुलाध्यक्षः भवति।

(2) कुलाध्यक्षः काले काले विश्वविद्यालयानां महाविद्यालयानां विद्यालयानां संस्थानां च कार्यस्य प्रगतेश्च समीक्षां विधाय तदुपरि वृत्तान्तप्रस्तुत्यर्थम् एकम् उत तदधिकम् अधिकारिणं नियोक्तुं शक्नोति। वृत्तान्तप्राप्त्यनन्तरं कुलाध्यक्षः कुलपतिद्वारा कार्यकारिपरिषदि विचारं कृत्वा अपेक्षानुसारं निर्देशं विधातुं शक्नोति । विश्वविद्यालयः अवश्यं निर्देशस्य पालनं कुर्यात् ।

(3) विश्वविद्यालये विद्यमानानां भवनानां ग्रन्थालयानां प्रयोगशालानाम् उपकरणानां तथा च विश्वविद्यालये कस्यापि केन्द्रस्य विभागस्य सङ्कायस्य महाविद्यालयस्य अथवा विश्वविद्यालयद्वारा सञ्चाल्यमानसंस्थानाम् आहोस्वित् विश्वविद्यालयद्वारा सञ्चालितपरीक्षाणां शिक्षणस्य एवम् अन्यकार्याणाम् अर्थात् प्रशासनस्य वित्तसम्बद्धविषयादीनां परीक्षणं कर्तुं कारयितुं वा कुलाध्यक्षस्य अधिकारः भवति ।

(4) कुलाध्यक्ष: तृतीये उपबिन्दौ निर्दिष्टे प्रत्येकं विषये विश्वविद्यालयस्य निरीक्षणं परीक्षणं च कर्तुं कारयितुं वा सूचयति । विश्वविद्यालयः एतादृशम् अभ्यावेदयितुम् अपेक्षानुसारम् अधिकृत: भवेत्।

(5) तृतीये उपबिन्दौ निर्दिष्टानुसारं विश्वविद्यालयद्वारा अभ्यावेदितः यः कोऽपि विषय: तं विचार्य कुलाध्यक्ष: निरीक्षणं परीक्षणं वा कर्तुम् अधिकृत: भवति ।

(6) यत्र कुलाध्यक्ष: निरीक्षणं परीक्षणं वा कारयति तत्र विश्वविद्यालय: एकं प्रतिनिधिं नियोक्तुम् अधिकृतः भवति । स: प्रतिनिधि: निरीक्षणे परीक्षणे वा उपस्थातुं श्रोतुं वा अधिकृत: भवति।

7) यदि निरीक्षणं परीक्षणं वा विश्वविद्यालयद्वारा अथवा तेन सञ्चालितमहाविद्यालयानां सङ्कायानां संस्थानां सम्बद्धतया क्रियते। कुलाध्यक्ष: कुलपतिं निरीक्षणपरीक्षणयो: सन्दर्भे विभिन्नविचारैः सह सम्बोधयति। विश्वविद्यालयस्य परीक्षणसन्दर्भे आगन्तुकनां प्रवृत्तिः भवितुम् अर्हति । कुलपति: आगन्तुकद्वारा दत्तस्य सङ्केतस्य विषये संसूचनया सह कार्यकारिपरिषद: कृते आगन्तुकानां विचारान् सम्पेषयति।

(8) कार्यकारिपरिषत् कुलपतिद्वारा कुलाध्यक्षं प्रति कार्याग्रहस्य प्रस्तावं करोति । एवं निरीक्षणस्य परीक्षणस्य परिणामं सूचयति ।

(9) यदि कार्यकारिपरिषत् उचितसमयाभ्यन्तरे आगन्तुकस्य सन्तुष्ट्यर्थं कार्याग्रहं न करोति तर्हि कुलाध्यक्ष: कार्यकारिपरिषद्वारा दत्तस्पष्टीकरणविषये अथवा प्रतिनिधित्वविषये विचारानन्तरं योग्यं निर्देष्टुं शक्नोति । कार्यकारिपरिषत् निर्देशानां पालनं करिष्यति।

(10) अस्या: धारायाः पूर्वप्रावधानेषु प्रतिकूलप्रभावेण विना कुलाध्यक्ष: परिनियमानां विधीनाम् अध्यादेशानां च अनुरूपाभावे लिखितादेशद्वारा कमपि कार्याग्रहं तिरस्कर्तुं शक्नोति। कस्मादपि आदेशात् पूर्वं कुलाध्यक्ष: कुलसचिवं प्रति कारणं कथयितुं सूचयति यत् एतादृश: आदेश: किमर्थं न दीयेत । तथा च यदि कारणम् उचितसमयाभ्यन्तरे दर्श्यते तर्हि तस्मिन् विचार: करिष्यते ।

(11) कुलाध्यक्ष: परिनियमानुसारम् अन्यान् अपि अधिकारान् वहति ।

9. अधः प्रदत्ताः विश्वविद्यालयस्य विभिन्नाधिकारिणः -

1) कुलाधिपतिः 2) कुलपतिः 3) अध्ययनसङ्कायप्रमुखाः 4) कुलसचिव: 5) वित्ताधिकारी 6) परीक्षानियन्त्रकः 7) ग्रन्थालयाध्यक्षः 8) एवम् अन्ये अधिकारिणः ये च परिनियममनुसृत्य विश्वविद्यालयस्य अधिकारिरूपेण उद्घोष्यन्ते।

10. (1) परिनियमद्वारा निर्धारितविधिमनुसृत्य कुलाधिपतिनियुक्तिः सन्दर्शकेन (राष्ट्रपतिना) क्रियेत ।

(2) कुलाधिपतिः स्वकार्यालयस्योपरि आधारितः सन् विश्वविद्यालयस्य प्रमुखः भवति । यदि कुलाधिपतिः उपस्थितो भवति तर्हि विश्वविद्यालयस्य कार्यसमित्यामेवं विश्वविद्यालयस्य दीक्षान्तसमारोहे उपाधिप्रदाने आध्यक्ष्यं वहेत् ।

(3) कुलाधिपतिः विश्वविद्यालयस्य मुख्याधिकारिरूपेण कार्यं कुर्यात् यत्र कार्यपरिषद् अनुशासनात्मकमुख्यसमितिरूपेण कार्यं करोति ।

11. (1) कुलपतेः नियुक्तिः आगन्तुकसन्दर्शकैः क्रियेत, यत्र परिनियमानां पालनं कृत्वा नियुक्तिप्रक्रिया भवति।

(2) कुलपतिः विश्वविद्यालयस्य प्रमुखकार्याधिकारिरूपेण एवं शैक्षणिकाधिकारिरूपेण कार्यं कुर्यात्। विश्वविद्यालये विभिन्नविषयाणां समान्यपर्यवेक्षणं कुर्यात् एवं तदितरेषु विषयेषु च नियन्त्रणं कुर्यात्। विश्वविद्यालयस्याधिकारिणां विषये निर्णयस्वीकरणे कुलपतिः प्रभावी स्यात्।

(3) कुलपतिः यस्मिन् कस्मिन्नपि विषये अभिप्रायप्रकटने, स्वीयाधिकारप्रदर्शने च झटिति कार्यान्वयनं कर्तुमर्हति। अधिनियमानुसारेण कुलपतिः विश्वविद्यालये यस्य कस्यापि प्राधिकरणरस्य विषये प्रदत्तशक्तेः प्रयोगं कर्तुमर्हति । अपि च आगामिप्राधिकरणसमावेशे एतत्सम्बद्धविषये सूचयितुं, चर्चां च विधातुं शक्नोति । तस्मिन् विषये क्रियान्वयनं कर्तुं शक्नोति।

यदि अधिनियमसमावेशे स्वीकृतनिर्णयमनुसृत्य सम्बन्धिताधिकारी कार्यं न करोति तर्हि अमुमंशं कुलाधिपतीनां समीपे प्रेषयेत्, तदनु तस्मिन् विषये तस्य निर्णयः यः भवति स एव अन्तिमः स्यात्।

परन्तु यदि विश्वविद्यालयस्य सेवायां विद्यमानायाः कस्याश्चित् उपधारायाः विषये कुलपतिद्वारा कृतक्रियान्वयने आक्षेपः अस्ति तर्हि तस्य निर्णयस्य विषये सूचनाप्राप्तेः परं मासत्रयाभ्यन्तरे कार्यपरिषदि स्वविषये प्रतिनिधित्वं कर्तुम् अधिकारः भवति । एतादृशक्रियान्वयनविषये कार्यपरिषत् कुलपतिद्वारा कृतकार्यान्वयनस्य प्रतिपुष्टिं संशोधनम् अथवा निराकरणं कर्तुम् अर्हति ।

(4) कुलपतिः यदि मन्यते यत् यस्मिन् कस्मिन्नपि प्राधिकरणे स्वीकृतः निर्णयः प्रदत्तनियमानाम्, परिनियमानाम्, अध्यादेशानां च उल्लङ्घनं करोति अथवा विश्वविद्यालयस्य हिताय न भवति तर्हि सः तत्सम्बद्धोन्नताधिकारिणा स्वीकृतनिर्णयस्य पूर्णतः अथवा अंशतः पुनः समीक्षां कृत्वा षष्टिदिनाभ्यन्तरे पुनः प्रस्तोतुम् आदेष्टुम् अर्हति। यदि अधिकारिणः एतन्नाङ्गीकुर्वन्ति तर्हि अस्मिन् सन्दर्भे परामर्शकैः स्वीकृतः निर्णयः अन्तिमः स्यात् ।

(5) कुलपतिः एतादृशानाम् अधिकाराणां प्रयोगं कर्तुम् अर्हति एवं परिनियमैः कल्पितानाम् अन्यकर्तव्यानां पालनं कर्तुम् अर्हति।

12. प्रत्येकं विद्याशाखायाः अथवा परिषदः नियुक्तिः उक्तप्रकारेण क्रियते अपि च परिनियमद्वारा प्रकल्पितानां विभिन्नाधिकाराणां, कर्तव्यानां च पालनं प्रयोगश्च तत्र क्रियेत ।

13. (1) कुलसचिवस्य नियुक्तिः परिनियमेषु प्रतिपादितप्रक्रियया एवं सेवासम्बद्धनिबन्धनानां नियमानाञ्च आधारेण क्रियते ।

(2) कुलसचिवः विश्वविद्यालयपक्षतः अनुबन्धविषयेषु सन्धातुः भूमिकां वहेत् । मुख्यपत्राणामुपरि तथा कार्यालयीयप्रामाणिकपत्राणाम् उपरि हस्ताक्षरं कर्तुम् अधिकारी स्यात्। एवञ्च अन्याधिकाराणां प्रयोगम्, कर्तव्यानां परिनियमानां पालनञ्च कुर्यात्।

14. विश्वविद्यालयस्य प्रत्येकं निदेशकस्य नियुक्तिः प्रोक्तप्रक्रियानुसारेणैव क्रियेत एवं परिनियमेषु प्रतिपादितानुसारं विभिन्नाधिकाराणां प्रयोगं कुर्यात्, एवं विभिन्नकर्तव्यानां पालनं कुर्यात्।

15. वित्ताधिकारिणः नियुक्तिरपि उपर्युक्तरीत्यैव क्रियेत एवं परिनियमेषु प्रकल्पितानुसारं विभिन्नाधिकाराणां प्रयोगं कुर्यात् एवं विभिन्नकर्तव्यानां पालनं च कुर्यात् ।

16. परीक्षानियन्त्रकस्य नियुक्तिरपि उपर्युक्तरीत्यैव क्रियेत एवं परिनियमेषु प्रकल्पितानुसारं विभिन्नाधिकाराणां प्रयोगं कुर्यात् एवं विभिन्नकर्तव्यानां पालनं च कुर्यात्।

17. पुस्तकालयाध्यक्षस्य नियुक्तिरपि उपर्युक्तरीत्या सेवानियमानां तथा सूचनानामाधारेण क्रियेत । एवं परिनियमेषु प्रकल्पितानुसारं विभिन्नाधिकाराणां प्रयोगं कुर्यात् एवं विभिन्नकर्तव्यानां पालनं च कुर्यात्।

18. विश्वविद्यालस्य अन्याधिकारिणां नियुक्तिप्रक्रिया एवं तेषाम् अधिकाराः कर्तव्यानि च परिनियमेषु प्रदत्तविधिद्वारा क्रियेत ।

19. विश्वविद्यालयस्य अधोलिखिताः प्राधिकारिणः भविष्यन्ति। तद्यथा -

(i) न्यायालयः (ii) कार्यपरिषत् (iii) शैक्षणिकपरिषत् (iv) अध्ययनसमितिः (v) वित्तसमितिः (vi) योजना एवं पर्यावेक्षणसमितिः तथा (vii) एतादृशा अन्ये प्राधिकारिणः ये परिनियमैः विश्वविद्यालयस्यप्राधिकारिणः उद्घोष्यन्ते।

20. (1) न्यायालयस्य संविधानं तथा तस्य सदस्यानां पदावधिः तदेव भवति यत् परिनियमैः निर्धारितम्।

किन्तु परिनियमैः यावत्सङ्ख्याकाः सदस्याः विहिताः तावत्सङ्ख्याकानां सदस्यानां चयनं विश्वविद्यालयस्य शिक्षकेभ्यः, कर्मचारिभ्यः, छात्रेभ्यश्च निर्धारितपरिनियमानुसारं भविष्यति।

(2) अस्य अनुच्छेदस्य अधिनियमानाम् आधीने न्यायालयस्य सविधे अधोलिखिताः शक्तयः कार्याणि च भविष्यन्ति।

(a) विश्वविद्यालयस्य व्यापकनीतीनां कार्यक्रमाणाञ्च असकृत् समीक्षा क्रियते, एवं विश्वविद्यालयस्य संशोधनाय विकासाय च उपायानां बोधनम्।

(b) विश्वविद्यालयस्य वार्षिकप्रतिवेदनानां, वार्षिकलेखापुस्तकानां, वार्षिकलेखापरीक्षाणाञ्च प्रतिवेदनोपरि चर्चा क्रियते एवं सङ्कल्पानाम् उद्घोषणार्थञ्च ।

(c) कस्याश्चित् अपि समस्यायाः सम्बन्धे परामर्शान् दातुं प्रेषयितुं वा शक्यते ।

(d) एवम् अन्यकार्याणि कर्तुं परिनियमैः निर्देष्टुं शक्यते।

21. (1) कार्यकारिपरिषत् विश्वविद्यालयस्य प्रमुखकार्यनिर्वाहकसमितिः भविष्यति।

कार्यकारिपरिषदः सङ्घटनं तस्य सदस्यानां पदावधिः एवं तस्य शक्तयः कार्याणि च, परिनियमैः निर्दिष्टानुसारं भविष्यन्ति ।

22. (1) विद्यापरिषत् विश्वविद्यालयस्य प्रमुखशैक्षणिकसमितिः भविष्यति, एवम् अस्य अनुच्छेदस्य प्रावधानस्य अधीने विश्वविद्यालयस्य शैक्षिकनीतीनां समन्वयनम्, सामान्यं पर्यवेक्षणञ्च करिष्यति ।

(2) विद्यापरिषदः सङ्घटनम्, तस्य सदस्यानां पदावधिः तस्य शक्तयः, तस्य कार्याणि च तथैव भविष्यन्ति यथा परिनियमैः निर्दिष्टानि सन्ति ।

23. अध्ययनसमितेः सङ्घटनम्, शक्तयः, कार्याणि च तथैव भविष्यन्ति यथा परिनियमैः निर्दिष्टानिसन्ति।

24. वित्तसमितेः सङ्घटनम्, शक्तयः, कार्याणि च तथैव भविष्यन्ति यथा परिनियमैः निर्दिष्टानिसन्ति।

25. योजना एवं पर्यावेक्षणसमितेः सङ्घटनम्, शक्तयः, कार्याणि च तथैव भविष्यन्ति यथा परिनियमैः निर्दिष्टानिसन्ति ।

26. अन्यप्राधिकारिणां सङ्घटनम्, शक्तयः, कार्याणि च ये परिनियमैः विश्वविद्यालयस्य प्राधिकारिणः उद्घोष्टुं शक्यन्ते, ते भविष्यन्ति ये परिनियमैः विहिताः।

27. अस्य अधिनियमस्य (Act) उपबन्धानामधीने (Statute) परिनियमानाम् अधो निर्धिष्टेषु सर्वेषु विषयेषु अथवा केषुचित् नियमेषु उपबन्धाः निर्मातुं शक्याः । ते यथा (a) विश्वविद्यालयस्य प्राधिकारिणां (the authorities), अन्यनिकायानां (other bodies) च नियोजनं, समये समये स्यात्। तेषां नियोजनं, तेषामधिकाराः, तेषां कर्तव्यं च।

(b) पूर्वोक्तानां प्राधिकारिणां, निकायसदस्यानां नियुक्तिः, नियुक्तानां तेषु पदेषु प्रस्थितिः (continuance) रिक्तानां सदस्यानां पूरणम्, प्राधिकारिणां निकायानां वा सम्बद्धेषु अन्येषु सर्वेषु विषयेषु अपेक्षितांशेषु वा आवश्यकतायां सत्यामुइच्छायां सत्यां वा उपबन्धनिर्माणम्।

(c) विश्वविद्यालयस्य अधिकारिणां नियुक्तिः, तेषाम् अधिकाराः, कर्तव्यानि, उपलब्धयश्च (Emoluments).

(d) विश्वविद्यालयस्य अध्यापकानाम्, शैक्षिककर्मचारिणाम्, अन्यकर्मचारिणां नियुक्तिः, तेषाम् उपलब्धयः सेवानियमाश्च।

(e) यस्याः कस्याः वा संयुक्तपरियोजनायाः कार्यान्वयनार्थं विश्वविद्यालयान्ते संस्थान्ते वा निर्दिष्टकालार्थं नियुक्तिः।

(f) निवृत्तिवेतन-बीमा-भविष्यनिधि-सेवासमाप्तीनां रीतिः तथा अनुशासनात्मककार्यप्रावधानसहिताः कर्मचारिणां सेवानियमाः ।

(g) विश्वविद्यालयस्य सेवायां नियुक्तेषु कर्मचारिषु ज्येष्ठतानिर्णायकांशाः ।

(h) विश्वविद्यालयस्य कर्मचारिषु छात्रेषु वा विवादे समुत्पन्ने माध्यस्थतायाः (Arbitration) प्रक्रिया ।

(i) विश्वविद्यालयस्य केनचित् अधिकारिणा अथवा पदाधिकारिणा विहितस्य दण्डविधानस्य विरोधेकेनचित् कर्मचारिणा छात्रेण वा कार्यपरिषदि निवेदनप्रक्रिया।

(i) कस्मैचित् महाविद्यालयाय, कस्यैचित् संस्थायै, कस्मैचित् विभागाय, कस्मैचित् विद्यालयाय, कस्मैचित् केन्द्राय वा स्वायत्तता प्रदानम् ।

(k) परिसराणां (Campuses), महाविद्यालयानां, संस्थानां, केन्द्राणां विभागानां (Department), छात्रावासानां, संस्थापनम् उन्मूलनं च ।

(1) सम्मानोपाधीनां प्रदानम् ।

(m) गौरवोपाधीनां, डिप्लोमापाठ्यक्रमस्य, प्रमाणपत्रपाठ्यक्रमाणां, अन्यशैक्षिकांशानाम् उपसंहारः ।

(n) विश्वविद्यालयद्वारा प्रतिष्ठापितानां महाविद्यालयानां संस्थानानाञ्चप्रबन्धनम्।

(o) विश्वविद्यालयस्य प्राधिकारिषु अधिकारिषु वा निहितशक्तीनां प्रत्यायोजनम् (Delegation)।

(p) कर्मचारिषु विद्यार्थिषु च अनुशासनतापरिपालनम्।

(q) अमुम् अधिनियममनुसृत्य परिनियमद्वारा अन्ये सर्वविषयाः उपनिबध्याः अथवा उपनिबध्यन्ते।

28. (1) अस्य परिनियमस्य द्वितीयानुसूच्यां ये अंशाः विवृताः ते प्रथमनियमान्तर्गताः ।

(2). कार्यपरिषत् काले काले नूतनान् अथवा अतिरिक्तपरिनियमान् कर्तुमर्हति अथवा प्रथमोपधारायां (उपधारा) (1)

निर्दिष्टानां परिनियमानां परिष्करणं निराकरणं वा कर्तुमर्हति ।

किन्तु कार्यपरिषद् विश्वविद्यालयस्य कस्यापि प्राधिकारिणः संस्थिते ( Statutes ) परिनियमे शक्तेः, सत्तायाः वा उपरि प्रभावं दर्शयन्ति । तादृशानां परिनियमनिर्माणं, तेषां परिष्कारं, तेषां निषेधं वा तावत् पर्यन्तमपि न करोति यावत् पर्यन्तं प्राधिकारी प्रतिपादितानां परिवर्तनानां विषये स्वाभिप्रायं लिखितरूपेण अभिव्यञ्जयितुम् अवसरं न प्राप्नोति । एवंप्रकारेण लिखितरूपेण प्राप्तानाम् अभिप्रायाणां विषये कार्यपरिषत् चिन्तनं करिष्यति।

(3) प्रत्येकमपि नूतनपरिनियमाय अथवा कस्यापि परिनियमस्य परिवर्धनाय अथवा तत्परिष्काराय तिरस्काराय वा कुलाधिपतेः अनुमतिः अपेक्षिता । कुलाधिपतिः तेभ्यः अनुमतिं दातुमर्हति अथवा निराकर्तुमर्हति अथवा कार्यपरिषदः अनुचिन्तनाय प्रतिप्रेषयितुमर्हति।

(4). यावत् पर्यन्तं कुलाधिपतेः अङ्गीकारः न भवति तावत् पर्यन्तमपि न कोऽपि परिनियमः अथवा विद्यमान परिनियमस्य परिष्कारः अथवा तिरस्कारात्मकः परिनियम: विधिमान्यः न भविष्यति ।

(5) पूर्वं विद्यमानासु उपधारासु (Sub section) के वा विचाराः भवन्तु नाम, तथापि कुलाधिपतिः अस्य अधिनियमस्य आरम्भात् त्रयाणां वर्षाणाम् अवधौ नूनतम् अथवा अतिरिक्तं परिनियमं कर्तुं शक्नोति अथवा प्रथमोपधारायां {उपधारा- (1) } निर्दिष्टानां परिनियमानां परिष्कारम् अथवा तिरष्कारं कर्तुं शक्नोति । परन्तु कुलाधिपतिः, निर्दिष्टानां त्रयाणां वर्षाणां परिसमाप्तेः अनन्तरम्, एतादृशान् विस्तृतपरिनियमान् यान् आवश्यकमिति चिन्तयति, तेषां समाप्तेः दिनाङ्कात् एकवर्षाभ्यन्तरे कर्तुमर्हति । ते च विस्तृताः परिनियमाः संसदः उभयसदनयोः पुरतः स्थापिताः स्युः ।

(6) अस्यां धारायां ये केऽपि विषयाः भवन्तु नाम, कुलाधिपतिः आत्मना विनिर्दिष्टे यस्मिन् कस्मिन्नपि विषये परिनियमेषु उपबद्धं विश्वविद्यालयाय निर्देशं दातुमर्हति । तथैव यदि कार्यपरिषत् कस्यापि एतादृशनिर्देशस्य प्राप्तेः षष्टिदिनाभ्यन्तरे कार्यान्वयेन समानेतुम् असमर्था भवति तर्हि एतादृशनिर्देशस्य अनुपालने कार्यपरिषदा संसूचितकारणानि परिशील्य, कारणानि यादृशानि वा भवन्तु यथायोग्यं परिनियमान् कर्तुम् अथवा परिष्कर्तुं कुलाधिपतिः प्रभवति।

29. (1) एतस्मिन् अधिनियमे विधीनां प्रावधानाधीनतया अधोलिखितेषु विषयेषु सर्वेषु केषुचित् वा अध्यादेशाः उपबन्धाः कर्तुं शक्यन्ते । तथा हि -

(a) विश्वविद्यालये छात्राणां प्रवेशः तेषां नामाङ्कणस्य च विषये ।

(b) विश्वविद्यालयस्य सर्वेषाम् उपाधीनाम् उपाधिपत्राणां प्रमाणपत्राणां चानुरोधेन अध्ययनक्रमस्य पाठ्यक्रमस्य वा निर्धारणम्।

(c) शिक्षायाः परीक्षायाश्च माध्यमम् ।

(d) उपाधीनां (ससम्मानितोपाधिः), उपाधिपत्राणां प्रमाणपत्राणां तथा अन्यशैक्षिकविशिष्टोपलब्धीनां च कृते अर्हताः नाम तेषामुपाधीनां प्रदानाय प्राप्तये च अर्हता इति।

(e) विश्वविद्यालये प्रचाल्यमानेभ्यः अध्ययनक्रमेभ्यः, तथाचविश्वविद्यालयस्यपरीक्षा-उपाधि- उपाधिपत्र-प्रमाणपत्रेभ्यः प्रवेशशुल्कम् ।

(f) अध्येतृवृत्ति-विद्वद्वृत्ति-छात्रवृत्ति-पदक पुरस्कारप्रदानाय निर्बन्धाः /मानकम् ।

(g) परीक्षकवर्गाणां, परीक्षकाणां मध्यस्थानां च कार्यालयीयानामवधेः कर्तव्याणां निर्धारणेन सह परीक्षाणां सञ्चालनम् ।

(h) छात्राणां वासाय, कक्ष्याणां, प्रयोगशालानां ग्रन्थालयानां, सभाङ्गणानां, क्रीडाङ्गणानाम् अन्येषां च विश्वविद्यालयीयसौविध्यानांकृतेनिर्बन्धाः /मानकानि ।

(i) महिलाच्छात्राणां वासार्थम् अध्ययनार्थञ्च क्रियमाणा विशेषव्यवस्थास्याञ्चेत् काचित्, तथैवैताभ्यः अध्ययनस्य विशेषपाठ्यक्रमनिर्धारणम् ।

(j) शैक्षिककेन्द्राणाम्, शैक्षिकपरिषदाम्, शास्त्रान्तराध्ययनानाम्, विशेषकेन्द्राणाम्, विशिष्टप्रयोगशालानामितरासां च समितीनां संस्थापनम् ।

(k) इतरविश्वविद्यालयैः संस्थाभिः विद्वन्निकायसङ्घयुतैः इतरैः अभिकर्तृभिः सहसहकारसहकारितायाञ्श्च रीतिः/पद्धतिः।

(1) विश्वविद्यालयस्यशैक्षिकवातावरणस्य (जीवनस्य) अभिवृद्ध्यर्थमावश्यकत्वेन मन्यमानानाम् अन्येषां सङ्घानां निर्माणं, संरचनं, नियोगश्च ।

(m) अध्येतृवृत्ति-विद्वद्वृत्ति-छात्रवृत्ति-पदक- पुरस्काराणां संस्थापनम् ।

(n) कर्मचारिणां छात्राणां च परिवादानां निवारणाय यान्त्रिकव्यवस्थापनम् ।

(0) इतरे च सर्वे विषयाः ये तावत् अनेनाधिनियमेन, एतैर्विधिभिः (परिनियमैः) अध्यादेशैर्वा सम्पादनीयाः सम्पादयितुं शक्या वा/कल्पनीयाः कल्पयितुं शक्या वा ।

(2) आद्यध्यादेशाः कुलपतिनाकार्यकारिपरिषदः पूर्वानुमत्या / पूर्वानुमोदनेन विधेयाः, तेषु च विहिताध्यादेशेषु कार्यकारिपरिषदा यदा कदापि परिविधिभिः सूचितरीत्यां (निर्धारितरीत्यां) संशोधनं निरसनं संयोजनं वाशक्यते कर्तुम् ।

30.विश्वविद्यालयीयाधिकारिणः स्वीयव्यवसायं स्वीयसमितीः च सञ्चालयितुम् तदधिनियमपरिनियमा-ध्यादेशानुगुणं विनियमान् (उपनियमान्) विधातुं शक्नुवन्ति । यदि कस्याश्चित् विनिर्मितसमितेः सञ्चालनाय एतदधिनियमविध्यध्यादेशेषु विधिभिः प्रोक्त/निर्धारितरीत्या तादृशा अधिविनियमाः न सन्तितर्हि ।

31. (1) कार्यकारिपरिषदो निर्देशानुसारं विश्वविद्यालयस्य वार्षिक प्रतिवेदनं सज्जीकरणीयम्, यस्मिन् इतरविषयैः सह विश्वविद्यालयेन स्वीयोद्देश्यपूर्तये स्वीकृताः निर्णयाः भविष्यन्ति, तच्च प्रतिवेदनं न्यायालयाय नियते दिनाङ्के ततः प्राग् वा समर्पणीयम् । येन न्यायालयेन स्वीयवार्षिकसमावेशे एतत् संज्ञानीकर्तुं विचारयितुं वा शक्येत ।

(2) न्यायालयः कुलाध्यक्षाय सटिप्पणि वार्षिक प्रतिवेदनं प्रस्तोष्यति (टिप्पण्यः यदि स्युः)।

(3) अन्तर्विभागः (1) अनुसारेण सज्जीकृतस्य वार्षिक प्रतिवेदनस्य प्रतिलिपिः केन्द्रसर्वकाराय समर्पणीया, यस्तावत् यावच्छीघ्रं तां संसद उभयोः सदनयोः पुरतः प्रस्तूयात्।

32. (1) प्रतिवर्षं न्यूनातिन्यूनमेकवारं तदन्तराले वा पञ्चदशमासावधिमनतिक्रम्य कार्यकारिपरिषदोनिर्देशानुसारं विश्वविद्यालयस्यवार्षिकालेखाः देयादेयविवरणपत्राणि च सज्जीकरणीयानि। यानि च भारतस्य नियन्त्रकमहालेखापरीक्षकेण तेन तदर्थं प्राधिकृतैः जनैर्वा परीक्षितानि भवेयुः।

(2) लेखापरीक्षितप्रतिवेदनेन कार्यकारिपरिषदः टिप्पणीभिः सहवार्षिकलेखानां प्रतिलिपिः न्यायालयस्य कुलाध्यक्षस्य च पुरतः प्रस्तोतव्या भविष्यति।

(3) वार्षिकलेखासु कुलाध्यक्षेणकृताः टिप्पण्यः न्यायालयस्य संज्ञाने आनेयाः। तथा न्यायालयस्य टिप्पण्यः, यदि स्युः, तर्हि कार्यकारिपरिषदा विचार्यततः कुलाध्यक्षाय उपस्थापनीयाः।

(4) लेखापरीक्षितप्रतिवेदनेन कार्यकारिपरिषदः टिप्पणीभिः सह वार्षिकलेखानां कुलाध्यक्षाय समर्पिता प्रतिलिपिः केन्द्रसर्वकारायापि समर्पणीया। यस्तावत् यावच्छीघ्रं तां संसद उभयोः सदनयोः पुरतः प्रस्तूयात्।

(5) लेखापरीक्षिता वार्षिकलेखाः उभयोः सदनयोः पुरतः प्रस्तावानन्तरं भारतस्य राजपत्रे प्रकाशिता भविष्यन्ति।

33. विश्वविद्यालयः केन्द्रीयसर्वकाराय स्वसम्पत्तिविषयेस्वगतिविधीनां सम्बन्धे चविवरणमथवा अन्यविधसूचनां प्रस्तोष्यति, यत् केन्द्रीयसर्वकारः समये समये समुचितावध्यभ्यन्तरे निर्दिशति।

34. (1) विश्वविद्यालयस्य प्रत्येकं कर्मचारिणः एकेन लिखितानुबन्धानुसारेण नियुक्तिः भविष्यति। यः लिखितानुबन्धो विश्वविद्यालयस्य पार्श्वे भविष्यति। तस्य एका प्रतिलिपि: सम्बन्धितकर्मचारिणे दास्यते।

(2) विश्वविद्यालयकर्मचारिणोः मध्ये अनुबन्धेनोत्पन्नः कश्चन विवादः समाधातुं कर्मचारिणोऽनुरोधेन मध्यस्थतायाः कृते एकः न्यायाधिकारी प्रेष्यते, यत्र अन्तर्भवति कार्यकारिपरिषदा नियुक्तः एकः सदस्यः, कर्मचारिणा चितः एकः सदस्यः तथा आगन्तुकेन नियुक्तः निर्णायकः।

(3) न्यायमण्डलस्य निर्णयः अन्तिमः भविष्यति, न्यायमण्डलैः प्रदत्तनिर्णयसम्बन्धे कस्मिंश्चिदपि सिविलन्यायालये तं विषयं निर्णेतुं निरीक्षितुं वा आवेदयितुं न शक्यते। परन्तु अस्यामुपधारायां केचनापि कर्मचारिणः संविधानस्य 32 एवं 226 अनुच्छेदानुसारं न्यायसम्बन्ध्युपचाराणां लाभं प्राप्तुं शक्नुवन्ति। लाभप्राप्तये ते कर्मचारिणोऽवरोद्धुं न शक्यन्ते।

(4) उपधारा-(2) अनुसारं कर्मचारिणाकृतः प्रत्येकमनुरोधः सन्धिमध्यस्थताधिनियमः- 1996 इत्यत्र अन्तर्गतधारायाः समयानुसारं मध्यस्थतायै प्रस्तुतो मंस्यते।

(5) अधिकारिणः कार्यनियन्त्रणप्रक्रिया परिनियमैः निर्धारयिष्यते।

35. (1) “यः कोऽपि छात्रः अभ्यर्थी च यस्य नामकुलपतेः अनुशासनसमितेः अथवा परीक्षासमितेः यथासन्दर्भम् आदेशानुसारं सङ्कल्पानुसारं वा विश्वविद्यालयपरीक्षासूचीतः निष्कासितः”, “तथा च यः कोऽपि छात्रः अभ्यर्थी वा एकवर्षादधिककालस्य कृते विश्वविद्यालयीयपरीक्षायां भागं ग्रहीतुं वञ्चितः”, इत्येतादृशस्य आदेशस्य सङ्कल्पस्य वा लिखितसूचनाप्राप्तेः दिनाङ्कात् दशदिनाभ्यान्तरे कार्यकारिपरिषदि

निवेदयितुं शक्नोति, तथा कार्यकारिपरिषत् प्रायः पुष्टिसंशोधनं कुलपतेः अनुशासनसमितेः अथवा परीक्षासमितेः निर्णयस्य परिवर्तनं वा कर्तुं शक्नोति।

2) विश्वविद्यालयेन कस्यचित् छात्रस्य विरोधेकृतेन अनुशासनात्मकेनकार्यकलापेन उत्पन्नः विवादः तस्य छात्रस्य अनुरोधेन मध्यस्थतान्यायाधिकरणस्य (Tribunal of arbitration) अनुच्छेद-34 इत्यस्य (2), (3), (4) एवं (5) उपधाराणां प्रावधानैः सन्दर्भितो भविष्यति । एवम् एतदुपधारानुसारेण कृतस्य सन्दर्भस्य यावच्छक्यं क्रियान्वयनं भविष्यति।

36. विश्वविद्यालयस्य विश्वविद्यालयद्वारा संचालितस्य कस्यचित् महाविद्यालयस्य संस्थानस्य वा प्रत्येकं कर्मचारिणः छात्रस्य वा एतदधिनियमनिहितायां यस्यां कस्यां वार्तायां सत्यां, तादृशसमयाभ्यन्तरे, यथा परिनियमैः निर्धारयितुं शक्यते, कार्यकारिपरिषदि आवेदयितुमधिकारो भविष्यति। विश्वविद्यालयस्य कस्यचित् अधिकारिणः प्राधिकारिणः अथवा कस्यचित् महाविद्यालयस्य संस्थानस्य प्राचार्यस्य प्रबन्धकस्य वा निर्णयः कार्यकारिपरिषदा द्रढीकर्तुंसंशोधयितुं परिवर्तयितुं वा शक्यते ।

37 (1) विश्वविद्यालयः स्वीयकर्मचारिणां लाभाय तादृशस्य भविष्यनिधेः निवृत्तिनिधेर्वा निर्माणं करिष्यति अथवा तादृश्या अभिरक्षायोजनायाः अन्यस्य कल्याणकारिणः, सामाजिकासुरक्षायाश्च उपायान् कल्पयेत्, यद् उचितमिति भावयेत्,एवं रीत्या उपायान्कल्पयेत्, यत्परिनियमैः निर्धारितनियमानुसारं भवेत्।

(2) यत्र एतादृशभविष्यनिधेः घटनम् इत्थं प्रकारेण विहितमस्ति । तत्र केन्द्रसर्वकारः घोषणां कर्तुं प्रभवति यत् भविष्यनिधेः अधिनियमः-1925 इत्यस्य प्रावधानं तथा एतादृशनिधीनामुपरि प्रयुक्तं भविष्यति यथा एते निधयः सर्वकारीयाः निधयः आसन्।

38. काचित् व्यक्तिः सम्यग्रूपेण निर्वाचिता मनोनीता नियुक्ता अस्ति वा न वा, अथवा विश्वविद्यालयस्य कस्यापि प्राधिकरणस्य उत अन्यनिकायस्य सदस्यः भवितुमर्हति वा न वा इति प्रश्नो यदि उदेति तर्हि अयं विषयः कुलाधिपतये प्रेष्यते यस्य निर्णयोऽन्तिमो भवति।

39. विश्वविद्यालयस्य कस्यचित्प्राधिकरणस्य अथवा अन्यनिकायस्य सदस्यानां (पदेन सदस्यान् विहाय) मध्ये आकस्मिकरिक्तयो तया व्यक्त्या तेन निकायेन वा यावच्छीघ्रं यः व्यक्तिः यश्च निकायः सदस्यान् चिनोति, नियोजयति सहयोजयति वा । सः सदस्यः यस्य स्थानं रिक्तं जातम्, एवम् आकस्मिकरिक्तये च नियुक्त - निर्वाचित-मनोनीत सहयोजितव्यक्तिः तस्य अवधेः अवशेषार्थं तस्य प्राधिकरणस्य निकायस्य वा सदस्यो भविष्यति । यस्य स्थानं पूर्यते सः सदस्यः भवेत्।

40. विश्वविद्यालये यस्य कस्यापि अधिकारिणः अथवा प्रशासकसमितेः शासनमथवा निर्णयः, एकस्य अथवा बहूनां, सभ्यस्य अथवा सभ्यानाम् एकस्याः रिक्तेः रिक्तीनां वा कारणेन वितथं न भवति ।

41.विश्वविद्यालयाधिकारिभिः अथवा कर्मचारिभिः एतदधिनियमस्य परिनिमयस्य वा उपबन्धानुसरणार्थं सद्भावपूर्वकं कृतस्य करिष्यमाणस्य वा कार्यस्य विषये, विरोधे, वादो वा तेषां विश्वविद्यालयाधिकरिणाम् अथवा कर्मचारिणां न्यायसम्बद्धान्यविवादोन भविष्यति ।

42. 1872 तमवर्षस्य भारतीयसाक्ष्यसम्बद्धयन्यायाधिनियमेन अथवा अन्येन केनापि तत्कालप्रवृत्तन्यायनियमेन वा विसंवादिनि विषये - या कापि धनसम्प्राप्तिपत्रस्य प्रतिः, आवेदनपत्रं, विषयसूचना, आदेशः, प्राशासनिकनियमः, अथवा यस्य कस्यापि अधिकारिणः वा विश्वविद्यालयस्य समितेः वा कश्चन सान्दर्भिकनिश्चयः अथवा यत्किमपि विश्वविद्यलयीयप्रामाणिकपत्रम् अथवा विश्वविद्यालयस्य

नियताभिलेखे पुस्तके समुल्लेखितांशः तद्विश्वविद्यालयकुलसचिवेन प्रमाणीकृतश्चेत् तत् प्राप्तिपत्रं, तदावेदनपत्रं, तत्सूचनापत्रं, सः आदेशः, सः प्राशासनिकनियमः, सः निश्चयः, तत् पत्रं, तत् प्रमाणीकृतप्रकटनं वा विश्वसनीयसाक्ष्यरूपेण तेषु तेषु पत्रेषु विद्यमानाः अंशाः सर्वेऽपि भृशं विश्वसनीयसाक्ष्यांशत्वेन परिगण्यन्ते।

43. (1) यदि अनेन अधिनियमेन परिकल्पितानां प्रावधानानां सम्पादने कोऽपि क्लेशः भवति तर्हि केन्द्रसर्वकारः राजपत्रे प्रकाशितादेशद्वारा एतादृशं प्रावधानं कर्तुमर्हति । यदस्य परिनियमस्य प्रावधानैः सह असङ्गतं न भवेत्, यथा तेन प्रतीयते, क्लेशमपाकर्तुम् आवश्यकं तथा समीचीनं भवेत्। परन्तु एतस्य अधिनियमस्य प्रारम्भप्रभृति वर्षत्रयसमाप्तेरनन्तरं एतद्धारान्तर्गततया न कोऽप्यादेशः दातुं शक्यते ।

(2)एतदधिनियमस्य उपधारायां (1) कृताः सर्वेऽप्यादेशाः निर्माणानन्तरं यावच्छीघ्रं संसदः प्रत्येकं सदनस्य पुरतः संसदः सत्रकाले, त्रिंशतः दिनानां कृते प्रस्तुताः भविष्यन्ति । संसदः उभयसभयोः प्रतिसमावेशमपि एतेषाम् आदेशानाम् उपस्थापनं भवेत् । एकस्य समावेशस्य अवधिः अधिकाधिकं त्रिंशद्दिनात्मिका भवेत् । एतेषाम् आदेशानां प्रस्तावाः एकस्मिन् अथवाद्वयोः अथवा त्रिषु नैरन्तर्यसमावेशेषु प्रयुक्ताः भवेयुः । प्रथमप्रविष्टसमावेशे वा तदन्तरसमावेशे वा सभाद्वये एतेषु आदेशेषु परिवर्तनानि यदि सूचितानि अथवा सम्पूर्णतया एते आदेशाः तिरस्कृताः, ततः परम् एते आदेशाः सभ्यैः सूचितपरिवर्तनानुसारं पालनीयाः अथवा तिरस्कृताश्चेत् एतेषां पालनमेव न भवेत्। अतः उभयोः सभयोः सूचितपरिवर्तनानिअथवा तिरस्कारश्च दृष्टिवैषम्यं विना तस्य आदेशस्य आद्यस्थितेः व्यतिरिक्ततया न भवेयुः।

44. (1) सर्वे परिनियमाः, अध्यादेशाः, विनियमाश्च ये ये अस्मिन् अधिनियमे विद्यन्ते ते आधिकारिकराजपत्रे प्रकटयिष्यन्ते ।

(2) सर्वे परिनियमः, अध्यादेशाः, विनियमाः च, ये ये अस्मिन् अधिनियमे विद्यन्ते तेसंसदः उभयसभयोः प्रतिसमावेशमपि उपस्थापिताः भवेयुः । एकस्य समामेशस्य अवधिः अधिकाधिकं त्रिंशद्दिनात्मिका भवेत्। तेषाम् परिनियमानाम्, अध्यादेशानां, विनियमानां प्रस्तावः एकस्मिन् अथवा द्वयोः अथवा त्रिषु नैरन्तर्यसमावेशेषु प्रयुक्ताः भवेयुः । प्रथमप्रविष्टसमावेशे वा तदन्तरसमावेशे वा सभाद्वये एतेषु परिनियमाध्यादेशविनियमेषु परिवर्तनानि यदि सूचितानि अथवा सम्पूर्णतया एते तिरस्कृताः, ततः परम् एते सभ्यैः सूचितपरिवर्तनानुसारं पालनीयाः अथवा तिरस्कृताश्चेत् एतेषां पालनमेव न स्यात् । अतः सभ्ययोः सूचितपरिवर्तनानि अथवा तिरस्कारश्च दृष्टिवैषम्यं विना तस्य आदेशस्य आद्यस्थितेः व्यतिरिक्ततया न भवेयुः।

(3) परिनियमानाम् अध्यादेशानां विनियमानां च निर्माणस्य शक्तिः अस्याधिनियमस्य आरम्भदिनाङ्कात्पूर्वदिनाङ्कप्रभृति पूर्वव्यापिप्रभावप्रदशक्तिः सम्मिलिता भविष्यति । किन्तु कश्चन पूर्वव्यापी प्रभावः न भविष्यति । परिनियमानाम् अध्यादेशानां विनियमानां च रचनोचिताधिकारः तथानिर्मितसंविध्यादीनां रचना पूर्वतोऽपि तेषां प्रभावः यथा भवेत् तथा श्रद्धा देया। अस्मिन् प्रयत्ने एतस्य अधिनियमस्य समारम्भकालाभ्यन्तरे एव एतेषां प्रभावदिनाङ्कः अपि अन्तर्भवेत्। नवकल्पितानां परिनियमाध्यादेशविनियमानाम् अन्वयनं यस्याः कस्याः अपि व्यक्तेः प्रयोजनघातं यथा न कल्पयेत् तथा ते परिनियमाध्यादेशविनियमादयः ग्राह्याः ।

45. (1) अस्मिन् अधिनियमे तथा च परिनियमे यत्किमपि विद्यते चेदपि -

(a) अस्याधिनियमस्य प्रवर्तनाव्यवहितपूर्वं प्रत्येकं मानितविश्वविद्यालयस्य कुलाधिपतिः, कुलपतिः तथा च अन्यकर्मकर्तारश्च पूर्वनियमानुसारेणैव स्वसम्बन्धिकार्यकाले अर्थात् अवशिष्टकार्यकालपर्यन्तं कार्यभारग्रहणं कुर्युः । स एव नियमः समयश्च भवति यः स्वकार्यकालस्य प्रानिर्धारितः आसीत् ।

(b) अस्याधिनियमस्य प्रवर्तनात्पूर्वं कार्यकारिपरिषदः, शैक्षणिकसमितेः, योजनासमितेः, वित्तसमितेः, महायोजनाप्रदर्शकमण्डलम् (Planning and Monitoring Board) इत्यस्य च नियुक्ताः सदस्याः तथा समस्तमानितविश्वविद्यालये कर्मरताः परिषदः अस्याधिनियमस्य प्रवर्तनसमये तथा परिवर्तनसमयेऽपि अवशिष्टकार्यकालपर्यन्तं स्वस्वपदे पूर्वनियमानुसारेणैव कार्यं निर्वहेयुः। अस्मिन्नधिनियमे सर्वासां शक्तीनां प्रयोगं तथा प्राधिकारिणः सर्वेषामादेशानां पालनं करिष्यन्ति ।

(c)प्रथमन्यायालये एकत्रिंशदधिकाः सदस्याः न भवेयुः येषां निर्धारणं केन्द्रीयसर्वकारेण भवेत् । ते वर्षत्रयावधौ नियुक्ताः भविष्यन्ति।

किन्तु (a) (b) इत्यनयोः निर्दिष्टकार्यालयेषु प्राधिकारिषु वा यदि कश्चन रिक्तो भवेत् तदा तस्य स्थाने आगन्तुकपरामर्शकद्वारा अथवा केन्द्रसर्वकारद्वारा नामाङ्किताया: व्यक्तेर्नियुक्तिः भविष्यति। सः व्यक्तिः तावत्पर्यन्तं नियुक्तः मनोन्नीतः वा तस्मिन् पदे भविष्यति यावत्पर्यन्तं तस्मिन् पदे कस्यचिदधिकारिणः सदस्यस्य वा नियुक्तिर्न भवेत्। किन्तु इदमप्यवधेयं यत् अस्य अधिनियमस्य प्रारम्भात् प्राक् खण्डयोः (a) (b) इत्यनयोः निर्दिष्टे कस्मिंश्चिदपि प्राधिकरणे नियुक्तः कोऽपि व्यक्तिः सदस्यो वा अधिनियमस्य प्रावधानानुरूपः न वर्तते, तदा तस्य नियुक्तिः सदस्यता वा समाप्ता भविष्यति।

(2) अस्य अधिनियमस्य प्रवर्तनात्पूर्वं नियुक्ताः समस्ताः मानितविश्वविद्यालयस्य तथा अन्यत्र पदे विद्यामानाः कर्मचारिणः अवशिष्टकार्यकालपर्यन्तं पूर्वनियमानाम् अर्थात् पूर्वनिश्चितसमयानामेव परिपालनं कुर्युः ।

(3) अस्य अधिनियमस्य प्रारम्भात् पूर्वं कस्यचित् मानितविश्वविद्यालयस्य कस्मिन्नपि कार्यक्रमे पाठ्यक्रमे वा कश्चन छात्रः प्रविशति चेत् पूर्वपाठ्यक्रमनियमानुसारेण पूर्वकार्यक्रमनियमानुसारेण वा तस्य छात्रस्य स्थानान्तरं करणीयम् ।

(4) अस्य अधिनियमस्य प्रवर्तनात् पूर्वं मानितविश्वविद्यालयद्वारा यत्किमपि कार्यं कृतं विहितं वा या काsपि डिग्री (उपाधि) प्रदत्ता शैक्षणिकविशिष्टता वा प्रदता वर्तते तत्सर्वं मान्यं भविष्यति। अथ च एतदधिनियमद्वारा न्यायालयस्य सङ्घटने कृते कस्मिंश्चिदपि परिवर्तने सति कार्यकारिपरिषत्, शैक्षणिकसमितिः, वित्तसमितिः, महायोजनाप्रदर्शकमण्डलम् (Planning and Monitoring Board) सङ्कायः, अन्ये अधिकारिणश्च मान्याः भविष्यन्ति।

(5) अस्य अधिनियमस्य प्रारम्भात् पूर्वं किमपि प्रविधानं, कश्चन विनियमः अथवा आदेशः यदि दृश्यते ते धारा ३० (त्रिंशत्) इत्यनेन सम्बन्धिताः भवन्ति तर्हि ते यथापूर्वं पालयिष्यन्ते ।

(6) केन्द्रीयसर्वकारः अस्य अधिनियमस्य प्रावधानेषु प्रतिकूल प्रभावं विना यदि सः एवं कर्तुं युक्तं मन्यते तदा अधिसूचनाद्वारा एवमुपायान् विधातुं शक्नोति यद्विश्वविद्यालयस्य सञ्चालने अनुकूलतां भजन्ते।

46. विश्वविद्यालयः आवश्यकतायां सत्यां स्वीयकार्यप्रगतये परिषदः, मण्डलस्य, स्थायिसमितिनां केन्द्राणाञ्च सङ्घटनं कर्तुं प्रभवति ।

47. यत्र विश्वविद्यालयेन कस्मैचित् प्राधिकरणाय एतदधिनियमद्वारा विधिद्वारा वा समितिनियुक्त्यर्थं शक्तिः प्रदत्ता वर्तते, तत्र अन्यथोपबन्धितान् वर्जयित्वा तादृशीनां समितीनां प्राधिकरणसदस्यानां कस्यचित्प्राधिकरणस्य अन्यस्य व्यक्तेर्वा नियुक्तिं कर्तुं विश्वविद्यालयः अर्हो भविष्यति।